## अभ्यासः

1. **एकपदेन उत्तरं लिखत–**

   (क) सिद्धार्थः कस्यां कक्षायां पठति?

   (ख) देशः कस्य तुल्यः अस्ति?

   (ग) 'शन्नोवरुणः' इति कस्याः ध्येयवाक्यम् अस्ति?

   (घ) देशसेवायाः सर्वेषां मार्गाणाम् उद्देश्यं किम्?

   (ङ) सिद्धार्थस्य मित्रं कः?

2. **एकवाक्येन उत्तरं लिखत–**

   (क) बालचरः इत्युक्ते किं ज्ञायते?

   (ख) 'राष्ट्रियछात्रसेनायाः' (एन.सी.सी.) ध्येयवाक्यं किम्?

   (ग) सेनायाः त्रिविधप्रकाराः के सन्ति?

   (घ) बालचरस्य प्रथमा प्रतिज्ञा का अस्ति?

   (ङ) छात्रजीवने देशसेवायाः मार्गौ कौ?

3. **रेखाङ्कितपदम् आधृत्य प्रश्ननिर्माणं कुरुत–**

   (क) <u>सिद्धार्थः</u> सप्तम्यां कक्षायां पठति।

   (ख) गणवेशधारिणः वयं <u>बालचराः</u> स्मः।

   (ग) <u>"सर्वेषां सहायता"</u> इति द्वितीया प्रतिज्ञा।

   (घ) जलसेना <u>जलमार्गात्</u> देशसुरक्षां करोति।

   (ङ) बालचरः एकं ग्रामं <u>जनसेवायै</u> गच्छति।

4. **मेलनं कुरुत–**

| | (अ) | (ब) |
|---|---|---|
| (क) | शन्नोवरुणः | वायुसेना |
| (ख) | एकता अनुशासनञ्च | जलसेना |
| (ग) | नभः स्पृशं दीप्तम् | राष्ट्रियछात्रसेना |
| (घ) | सेवा अस्माकं धर्मः | स्थलसेना |

5. कोष्ठकात् चित्वा वाक्यानि रचयत–

| |
|---|
| अहम् |
| भवान् |
| वयम् |

| |
|---|
| पठति, अनुपालयामः, लिखामि। |
| गच्छामि, गच्छति, कुर्मः। |
| प्रेरयति, विचरामः, करोमि। |
| रक्षति, गच्छामः, प्रेरयामि। |
| शृणोमि, भवामः, करोमि। |

6. उदाहरणानुगुणं रूपाणि लिखत–

प्रथमपुरुषः

| | धातुः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|---|
| यथा- | (वर्तमाने-लट्) गम् | गच्छति | गच्छतः | गच्छन्ति |
| | (आज्ञायां-लोट्) गम् | गच्छतु (गच्छ् + अतु) | गच्छताम् (गच्छ् + अताम्) | गच्छन्तु (गच्छ् + अन्तु) |
| | (क) लिख् | | | |
| | (ख) दृश् (पश्य्) | | | |
| | (ग) वद् | | | |
| | (घ) क्रीड् | | | |
| | (ङ) उपविश् | | | |

मध्यमपुरुषः

| | धातुः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|---|
| यथा- | (वर्तमाने-लट्) गम् | गच्छसि | गच्छथः | गच्छथ |
| | (आज्ञायां-लोट्) गम् | गच्छ (गच्छ् + अ) | गच्छतम् (गच्छ् + अतम्) | गच्छत (गच्छ् + अत) |
| | (क) लिख् | | | |
| | (ख) दृश् (पश्य्) | | | |
| | (ग) वद् | | | |
| | (घ) क्रीड् | | | |
| | (ङ) उपविश् | | | |

**उत्तमपुरुषः**

| | धातुः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|---|
| यथा- | (वर्तमाने-लट्) गम् | गच्छामि | गच्छावः | गच्छामः |
| | (आज्ञायां-लोट्) गम् | गच्छानि | गच्छाव | गच्छाम |
| | | (गच्छ् + आनि) | (गच्छ् + आव) | (गच्छ् + आम) |
| | (क) लिख् | | | |
| | (ख) दृश् (पश्य्) | | | |
| | (ग) वद् | | | |
| | (ङ) उपविश् | | | |
| | (घ) क्रीड् | | | |

**7. कोष्ठके प्रदत्तशब्दैः रिक्तस्थानानि पूरयत–**

(कक्षायां, ग्रामम्, सेवासंस्था, मातृतुल्यः, सेना, बालचराः, ताः प्रतिज्ञाः, मार्गाभ्याम्)

(क) कस्यां ........................ (ख) एकं ........................

(ग) एका ........................ (घ) गणवेशधारिणः ........................

(ङ) काः प्रतिज्ञाः ........................ (च) देशः ........................

(छ) एताभ्यां ........................ (ज) एषा ........................

## योग्यताविस्तारः–

- **बालचरसंस्थायां षड्वर्षात् आरभ्य षष्टिवर्षपर्यन्तं सेवां कर्तुं शक्नुमः–**

| तत्र बालकानां/पुरुषाणां | | योग्यताक्रमः | बालिकानां/महिलानां योग्यताक्रमः |
|---|---|---|---|
| | वर्षतः + ............ | योग्यता | योग्यता |
| | 6 + ............ | कब | बुलबुल |
| | 10 + ............ | स्काउट | गाइड |
| | 16 + ............ | रोवर | रेञ्जर |

अध्यापकसाहाय्येन अधिकं जानन्तु।

*वयं राष्ट्रे जागृयाम पुरोहिताः।*